# Shri Sharada Devi Ashtakam

# श्रीशारदादेव्यष्टकम्

## Document Information

Text title : Shri Sharada Devi Ashtakam

File name : shAradAdevyaShTakam3.itx

Category : deities_misc, gurudev, rAmakRiShNa, aShTaka

Location : doc_deities_misc

Author : Mitarayachaturdhurinya

Proofread by : Aruna Narayanan

Description-comments : rAmakRiShNastotramAlA, stavanAnjali

Acknowledge-Permission: Ramakrishna Shivananda Mission, Varasat

Latest update : June 12, 2023

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 12, 2023

*sanskritdocuments.org*

# श्रीशारदादेव्यष्टकम्

शारदा वरदा पुण्या सुदिव्यज्योतिर्मण्डिता ।
सार्धं श्रीरामकृष्णेन हृदये मम तिष्ठतु ॥ १॥

या शारदा मर्त्यमलं करोति
ज्ञानप्रदा सैव सरस्वती हि ।
ध्येया सदा सा भवभञ्जनाय
ज्ञेया भवानी जननीति नित्यम् ॥ २॥

इत्थं स्तवैः श्रीप्रभु-रामकृष्णो
यामर्चयामास शुभां वरेण्याम् ।
मायावृतां भस्मनिगूढ वह्निं
सा मङ्गला मङ्गलमातनोतु ॥ ३॥

सेवा परं पङ्कजपाणियुग्मं
श्रीरामकृष्णाय च दत्तचित्तम् ।
यस्याः प्रसन्नास्यसुहास्यबिम्बं
नित्यं जने सा करुणां दधातु ॥ ४॥

लज्जावगुण्ठनवती पतिगेहलक्ष्मीः
सा षोडशीति ललनासु ललामभूता ।
पूजामगृह्णदभया सदया स्वपत्युः
मग्ना समाधि जलधौ खलु भावलीना ॥ ५॥

या घोषितार्चन परैस्तु नरेन्द्रमुखैः
कालीति कल्मषहरीति जननी च साक्षात् ।
प्रत्यक्षगम्यपरमाद्भुतमूर्तरूपा
सद्यो भयं हरतु सा भवभीतिभीरोः ॥ ६॥

तेजः पुञ्जतपः प्रभावविभया देदीप्यमाना सदा

हस्ताब्जे जपमालिकां धृतवती कल्याणयज्ञे रता ।
शश्वद्भक्तजने त्वनुग्रहकरी पुण्यप्रदा मोक्षदा
गङ्गातोयसमा प्रसादनिलया श्री शारदा पातु नः ॥ ७॥

लीलादेहधरी सदा सहचरी श्री रामकृष्णस्य या
देवेशस्य युगप्रयोजनवशात् साक्षात् जगद्धात्रिका ।
धर्मस्थापनहेतवे धृतवपुर्नेतुं जनान् सत्पथं
भक्तिं मोक्षफलं सकृद् वितरितुं साम्बा प्रसीदत्वहो ॥ ८॥

इति अध्यापिका डॉ (कुमारी) कृष्णा बन्द्योपाध्याया (एम. ए. (डबल) पी-एच। डी.)
विरचितं “श्रीश्रीशारदादेव्यष्टकम्” सम्पूर्णम् ।

Proofread by Aruna Narayanan

*Shri Sharada Devi Ashtakam*

pdf was typeset on June 12, 2023

Please send corrections to *sanskrit@cheerful.com*